RROR

र्शः

श्री वेङ्कटरमणार्यः

K. A. KRISHNASWAMY IYER

UMA'S MIRROR

— WRITTEN BY —

MR. K. A. KRISHNASWAMY IYER, B.A.,

(Retired High School Hd. Master in Mysore)

WITH ITS SANSKRIT VERSION BY

MR. C. VENKATARAMANAIYA,

(Retired Inspector of Sanskrit Schools in Mysore)

PUBLSIHED BY

VIDWAN B. N. SUBRAHMANIYA JOIS

at his SRI VIJAYA LAKSHMI VILAS PRESS,

BANGALORE CITY.

उमादर्शः

अयम् ग्रन्थः

निवृत्तमहीशूरदेशीयसंस्कृतशालोपद्रष्टृपदेन

श्रीवेङ्कटरमणार्येण

विरचितः

निवृत्ताङ्गलविद्याशालाधिकारिणा

के. ए. श्रीकृष्णस्वाम्यार्येण

विरचितेन ' **उमास् मिरर्** ' इत्याख्याङ्गल

भाषाग्रन्थेन साकम्

बेङ्गलूरु श्रीविजयलक्ष्मीविलासमुद्राक्षरशालाधिकारिणा

बि. एन्. श्रीसुब्रह्मण्यदैवज्ञेन

स्वकीयमुद्राक्षरशालायां मुद्रितःप्रकटितस्सन् विराजते।

१९३७

श्री विजयलक्ष्मी विलास प्रेस, बेङ्गलूरु सिटि.

प्रस्तावना

तत्त्वज्ञानेन स्वरूपसाक्षात्कारे सति दुःखनिवृत्तिः सुखाविर्भूतिश्च भवतीति वेदशास्त्राणां समुद्घोषः खलु। एतमेवार्थं सामान्यजनानां सुबोधाय कथारूपेण, निवृत्ताङ्ग्लविद्याशालाधिकारिणा श्रीमता का. अ., कृष्णस्वाम्यार्येण "उमाम् मिरर्" (UMA'S MIRROR) इत्याख्यग्रन्थः आङ्ग्लभाषया विरचितः प्रकटितश्च। तदभिप्रायमनुसृत्य उमादर्शाख्योऽयं ग्रन्थः काव्यरूपेण मया विरचितः। एतत्पठन-पाठनेन स्त्रीबालगोपालानामपि किञ्चित् ज्ञानप्रयोजनम् भवेदेव। अतः आस्तिकमहाशयाः एतद्ग्रन्थप्रचारेण ग्रन्थकर्तृप्रयत्नं समादरेण सफलयन्त्विति सप्रश्रयं विज्ञापये।

श्री वेङ्कटरमणार्यः

ओम्

नमः परमात्मने

अथ उमादर्शाख्ये तत्त्वार्थकाव्ये

प्रथमस्सर्गः

इष्टदेवताप्रार्थनात्मकमङ्गलमुखेन उद्देशविन्यासः

ओमित्युमेत्यभेदाख्यं ध्यात्वा तत्त्वं जगन्मयम्।
याकुर्वेऽहमुमादर्शं कृष्णार्यस्मृतिगोचरम्॥

अवतरणिका (पूर्वाङ्गम्)

आत्मानन्दसमं नास्ति सुखं वैषयिकं परम्।
इति बोधयितुं तत्त्वं कथाभङ्ग्या जगाद सः॥

हूणभाषामयी वाणी संस्कृता दिव्यया गिरा।
संवदत्यत्र तत्तत्त्वं देववाणी स्ववीणया॥

काव्यकथारम्भः

उमा शिवेन स्वयमात्तमोदा
निर्व्याजमैच्छत् कलहं यमेतम् ।
श्रुत्याभिमुख्यं भुवनेषु नेतुम्
संप्रार्थये देवि ! सुवाङ्मयि त्वाम् ॥१॥

ययौ कदाचिन्मुनिनारदोऽसौ
कैलासलोकं महतीं दधानः ।
हितार्थमिच्छन् कलहं सदा यो
गान्धर्वनेता कृततत्त्वबोधः ॥२॥

उमा सहर्षाऽतिथिमागतं तं
सभाजयामास नुतार्घ्यपाद्यैः ।
दृष्ट्वा मुनिं तत्र शिवे सहासे
तद्गूढभावं न बुबोध सैषा ॥३॥

प्रासादभागांस्तमुमा निनाय
प्रदर्शयन्त्यद्भुतवस्तुजातम् ।
फलानि रस्यानि सुभोज्यमन्नं
समर्पयामास सुधां च तस्मै ॥४॥

UMA'S MIRROR.

PART I.

---

1. Uma's quarrel strange with Siva
I invoke thee Muse, to sing,
For to regions low or lofty
Soars alike thy golden wing.

2. Narada, the great musician
Leader of the Heavenly choir,
Once with heart some mischief brewing
Went to Kailas with his lyre.

3. Uma kindly bade him welcome,
Siva smiled to see the sage;
But her guest's design well shrouded
Uma did not guess or gauge.

4. Uma took him through the mansion
Showed him all the beauties rare,
Placed before him fruits and nectar,
Dainty and delicious fare.

5. With the cheer the sage delighted
Praised the hostess from his heart
Adding that a crystal mirror
Would to the place new charms-impart.

6. "Gates of fairy realms are mirrors—
Entered by no God or Man;
Nothing will depict thy beauty
As a small reflector can."

7. Saying so he soon departed,
Fearing what would soon ensue ;
And fair Uma for a Mirror
Straight to Siva eager flew.

8. "Long I craved, my dear," said Uma
"For a mirror, mighty Lord,
And no peace of mind without it
Night or day can me afford.

9. "Siva, Love, grant me a mirror
To behold my features in,
Since thou praisest still my beauty
That had power thy heart to win.

आतिथ्यकृत्यान्मुनिरात्तहर्ष-
स्तामातिथेयीं बहुधा शशास ।
आदर्शवस्तूपहितं भवेच्चे-
दादर्शनीयं गृहमित्युवाच ॥५॥

आदर्शको द्वारमहो ! विचित्र-
लोकस्य यद्देवनराद्यभेद्यम् ।
आदर्शयेत्ते निजबिम्बमार्ये !
नान्यद्विनादर्शमभेदरूपम् ॥६॥

संबोध्य देवीं स महर्षिरेवं
जगाम वेगेन विवादभीत्या ।
उमा जगामाथ शिवं च साक्षा-
दादर्शधीजन्यकुतूहलेन ।७।

हे प्राणनाथेश ! सदा मया त्वं
संप्रार्थितो दर्पणलाभहेतोः ।
रात्रिंदिवं तस्य विचिन्तनान्मे
चित्तं समाधातुमशक्यमास्ते ॥८॥

आदर्शदानेन कुरु प्रसादं।
प्रिय ' प्रियं रूपमभीक्षितुं मे ।
मद्रूपसम्पत्सुमनोहरेति
यत्त्वं सदा शंससि देव देव! ॥९॥

प्रदर्शनीया निजरूपभासो
　　ममेत्यहं त्वां सुचिरादयाचे ।
तथापि नालक्षयसीह मां त्वं
　　कृशां सुदीनां बहु शोचयन्तीम् ॥१०॥

साध्यं न किं साधयितुं ममेष्टं
　　प्रिय प्रभो! ते जगतां विधातुः ।
न्यूनं तव प्रेम मयीति नूनं
　　मुमोच बाष्पं सुदती वदन्ती ॥११॥

आक्षेपमेतं समुपोक्षितुं स
　　प्रभुर्न सेहे सरुजो ह्युमायाः ।
माक्षेपय त्वं प्रियवत्सले ! मा-
　　मित्याह किञ्चिद्भगवान् विहस्य ॥१२॥

कदापि नाहं कथयाम्यतथ्यं
　　विश्वास्यमेतत् सततं शुभाङ्गि ! ।
आदर्शकाचा न हि दर्शयेयुः
　　स्सुसूक्ष्मरूपं तव चानवद्यम् ॥१३॥

समस्तलोकेषु नरामराणां
　　विचार्य यत्नेन मनोहराणि ।
रूपाणि पश्यामि न कुत्र देवि !
　　त्वद्रूपसाम्यं प्रकृतिप्रवाहे ॥१४॥

10. "All these ages I have longed for
　　But my likeness to be shewn ;
Yet thou heed'st not, Mahadeva.
　　How I languish, pine, and moan.

11. "For the world's almighty maker
　　Is this hard, beloved, to get ?
Sure, thy love for me is cooling,"
　　And her eyes with tears were wet.

12. Worried Uma thus complaining
　　Siva could not brook to see!
Tender words he spoke, and smiling—
　　"Do not lay the blame on me.

13. "Trust me darling—for no falsehood
　　from my lips does ever escape,—
Mirrors can't return thy likeness
　　Too, too subtle is thy shape.

14. "Glancing through all spheres, my darling
　　Eying forms of gods or men
I can find in wide-spread nature
　　None like thee within my ken.

15. "Range through forests fields and cities
Flowery gardens, glens or rocks ;
Turn to where the wavy ocean
'Gainst the shore unweary knocks.

16. "Thou wilt find in all Creation
Nothing does thy image bear ;
Gross are gems, impure are crystals,
None reflects thy beauty rare."

17. Unconvinced was Goddess Uma,
Discontented still remained ;
Fancy prompted, she from Siva
Leave to search the worlds obtained.

18. Winged with novel thoughts and feelings
Flew she down from Kailas Mount
Made her way to star and planet,
Gleaming as of light the fount.

19. But their sight no joy imparted
To her eyes or heart divine ;
Too inane the whole appeared,
Lifeless all, they seemed to shine.
"These are none like me." she murmured
Life and consciousness are mine.,

बनेषु दुर्गेषु च पत्तनेषु
क्षेत्रेष्वथाब्धिष्वथ कन्दरेषु ।
शिलोच्चयाराममुखस्थलीषु
स्वयं प्रविश्यालमवेहि तत्त्वम् ॥१५॥

सर्गेषु सर्वेषु न पश्यसि त्वं ।
त्वद्रूपसाम्यं निजबोधरूपम्
जडं हि रत्नं समलो मणिश्च
त्वद्रूपबिम्बग्रहणाय नालम् ॥१६॥

जग्राह सोमा न तदर्थमेतं
मोहादतृप्ता क्षणमात्रमाह ।
गवेषयाम्यद्य जगत्प्रदेशे
प्रदेह्यनुज्ञां जगदीश मह्यम् ॥१७॥

नव्यैश्च भावैः परिचिन्तितैस्सा
व्युड्डीय कैलासगिरेश्शुकीव ।
इयाय ताराग्रहमण्डलं यत्
तेजोनिदानं भवतीव दीप्तम् ॥१८॥

हृन्नेत्रतोषं न ददौ हि तस्यै
तद्दर्शनं जाड्यमितीह सर्वम् ।
विभाव्य सोवाच न मत्समं त-
द्यत्प्राणचैतन्यविशेषिताऽहम् ॥१९॥

क्वेदं क्रियोगाधिविकारजातं
क्व बोधरूपो मम निर्मलात्मा ।
विविक्तवासास्सुखलेशशून्या
राजन्ति निश्चित्तजडान्धताराः ॥२०॥

वृथैव तेजो बत तारकाणां
भवन्ति येनैव हि भस्मसात्ते ।
सचेतनो जन्मवतां वरीयान्
एभ्योऽपि शोकाभिहतोऽपि नूनम् ॥२१॥

इत्थं समालोच्य भुवं जगाहे
लब्धुं क्षणादेव मनोरथं सा ।
विश्रान्तिरेकत्र कुतोऽलिमौलेः
पुष्पप्रकाण्डान्मकरन्दमिच्छोः ॥२२॥

तुषारशृङ्गं प्रथमं गिरीन्द्रं
सानुप्ररूढाखिलवृक्षगुल्मम् ।
प्रविश्य तस्थौ चिरमायताक्षी
कालं तिरस्कृत्य सदा विभान्तम् ॥२३॥

शिलोच्चया निर्झरवारिपाता
स्सरांसि कूलद्रुमशोभितानि ।
वनान्यभेद्यानि च सान्द्रवृक्षै–
र्व्याघ्रादिसत्त्वारवघोषितानि ॥२४॥

20. "What are ceaseless change and movement
When compared with consciousness
Blind and will-less stars are glowing,
Void of cheer in loneliness."

21. "Profitless to stars is glory
Burning each to ashes, O !
Better far are life and spirits,
Life with all its weal and woe."

22. Earthward now she quickly glided
Hoping there to find her quest,
As the bee for honey seeking
Fairest blossoms, knows no rest.

23. First she hovered over mountains
Standing up defying Time, [ing
Snow-crowned tops, and wastes display-
Plants and shrubs of every clime.

24. Soon the hills and rills and fountains,
Banks diversified with blooms,
Deepest forests veiled in darkness
Where the roar of tiger booms :

25 Haunts of peacocks with their feathers
Thousand-hued like India's eyes;
Flocks of parrots, swans, and Mynas
To her raptured vision rise.

26. But these outward sounds and colours
To her heart made no appeal.
"Trees enjoy no spicy odours,
Dales and mountains cannot feel.

27. "Birds and breezes know no music,
Void of self-reflexion all;
Spite of forms divine and lovely
charms but outward on me pall."

28. So she said, and bent her course to
Where the mighty billows sweep;
Folding now her golden pinions
Uma scoured the ocean deep.

29. Ocean whose mjestic motion
Hides as many gems as graves:—
Corals, pearls and monsters gliding
Or reposing in its caves.

इन्द्राक्षिसंकाशसहस्रचक्र-
वर्णोज्ज्वलद्बर्हधरा मयूराः ।
हंसाश्शुकास्सारसपक्षिमुख्या-
स्तद्दृष्टिमार्गं समुपेयुराराऽत ॥२५॥
एतैश्च बाह्यैर्निनदैः प्रकाशै-
रापान्तरात्मा न हि तृप्तिमस्याः ।
जिघ्रन्ति गन्धं न हि वृक्षसङ्घा-
स्स्पर्शं न जानन्ति दरीमहीध्राः ॥२६॥
खगा न जानन्ति न मारुताश्च
विवेकशून्या ननु गानसारम् ।
बाह्यानि रूपाणि विशन्ति नारं
रम्याणि दिव्यान्यपि मेऽन्तरङ्गम् ॥२७॥
इत्थं गिरन्ती व्रजति स्म तीव्रात
स्थिरप्रतिज्ञाऽऽत्मसुखार्थिनी सा ।
रिङ्गत्तरङ्गावलिलब्धकान्तिं
रत्नाकरं रत्नपरीक्षकेव ॥२८॥
यस्याम्बुमध्ये विनिगूहितानि
प्रवालानि रत्नानि कलेबराणि ।
यश्चांसि तत्तीरमुपन्त्युतोर्ध्वं
जलप्रणाल्या विचलन्ति तोये ॥२९॥

इदं स्थलं किं न हि दृष्टपूर्वं
स्वर्गोपमं भाति विचारदृष्टेः ।
प्रधानसृष्टेर्महिमार्धमस्मिन्
विमूर्छतीत्याह सुविस्मिता सा ॥३०॥

क्रीडन्ति नग्नाप्सरसोऽत्र मोदात्
क्षणं निमग्नाः क्षणमुत्प्लवोत्थाः ।
स्पर्धाक्षमा जातु तथापि नेमा
विवेकहीना यदमूर्भवन्ति ॥३१॥

उत्थाय सिन्धोर्धरणीतलेषु
प्रत्याशया तूर्णमधात् समीक्षाम् ।
पुरीषु रम्यासु च पत्तनेषु
स्तुत्यप्रजास्तोमविराजितेषु ॥३२॥

आस्येऽमरीके सदिरोपदेशे
हीराकराढ्ये च तथाऽपरीके ।
द्राक्षाकदम्बैस्सततं परीते
प्रत्यन्तरीपेच्छहरिद्रुमाभे ॥३३॥

नृलोकयात्राञ्चितचित्ररूपे
दूरान्तिकस्थप्रतिभूमिभागे ।
सान्विष्य भूयोऽपि सुविस्मिताऽभूत्
विलोक्य दुःखं कलहप्रधानम् ॥३४॥

30. "What a region this," she cried out.
"What a perfect paradise!
Nature shows not half such glory
As in waters buried lies"

31. "Sea nymphs in their garbless beauty,
Sporting wildly swim or sink;
Yet their life no envy kindles,
For they cannot judge or think."

32. Quick emerging from the ocean
Uma flies up to the land,
And surveys with hopes reviving
Peopled towns and cities grand.

33. Asia, 'Merica, and Europe,
Africa with diamond mines
Every green and shaded island
Rich with palmy groves and vines.

34. Every nook remote and corner,
Varied scenes of human life,
Uma searched and still she wondered
At the teeming woes and strife.

35. "Lo, the Whites stand out triumphant
Over the Blacks, Yellows, and [Browns;
And by higher wit maintaining
Their dominion, wear the crowns.

36. "With their forms, so fair, angelic,
Sweetest manner, finest grace,
Enterprise and skill and courage,
Here behold a gifted race!

37. "Manly are their air and bearing,
Chivalrous their cultured mind;
Superhuman their achievements
High their aims, and tastes refined.

38. "Long ago they broke the fetters
Superstitions still impose,
Free from narrow faith,-soul-strangling,
Bright their forehead ever glows.

39. "But within the bud is canker
Slowly eating into life;
'Neath their love of creed and order
Lurks ambition, restless strife.

हा श्वेतवर्णा मनुजा धरेशा
वर्णेतरान् सर्वजनान् विजित्य ।
विशेषबुध्या विभवानवाप्य
स्वायत्तभूरक्षणदक्षकार्याः ॥३५॥

पुण्ये कुले दिव्यसुरूपजाता
गाम्भीर्यभूषा व्यवहारयोग्याः ।
शूरास्सुधीरा नयकोविदास्ते
सर्वत्र सर्वे न गुणा मिलन्ति ॥३६॥

आकारसंसूचितपौरुषेड्याः
पराक्रमोपेतसुमेधसस्ते ।
अमानुषस्वीयकृतार्थकृत्या-
स्स्तुत्याशयाश्श्रेष्ठसुलक्ष्यदीप्ताः ॥३७॥

हृच्छूलभूतं लघुवर्त्म तीर्त्वा
सन्देहबन्धान् सुचरं विलङ्घ्य ।
उदारबुध्यैव निरङ्कुशास्ते
राजन्ति लोके धृतधीरभावाः ॥३८॥

तथापि कीर्तिक्षयहेतुभूतो
विषादमूलो वसति व्रणोऽन्तः ।
स्वोद्देशनिर्वाहगतिक्रमेभ्यो
दुराग्रहो दुःखकरा दुराशा ॥३९॥

भाग्येन किं भौतिकतत्वबोध-
प्रचारसंपादितकीर्तिभाजा ।
ज्ञानेन किं शब्दविजृम्भणात्त-
प्राज्ञप्रतिष्ठापरबोधनेन ॥४०॥

अहं ममेति प्रविभेदभावो
न चेन्महत्तत्कुलभागधेयम् ।
आत्मावबोधो यदि यस्य न स्या-
त्तस्यास्ति काऽऽशा भगवत्प्रसादे ॥४१॥

सदेन्द्रियार्थेषु विमोहितास्ते
नित्यात्मबुद्धिं न कदापि कुर्युः ।
क ईदृशा जन्ममृतिस्वभावं
संसारदुःखं विषहंतरेयुः ॥४२॥

धीशक्तिपाण्डित्यवतां हि तेषां
न प्रेरणं चेत्परतत्त्वलक्ष्ये ।
हीना जना तद्गुणजातभाग्यैः
कथं विजानीयुरथात्मतेजः ॥४३॥

स्वरूपमेतेषु मनोगुणेषु
स्वाकाङ्क्षितं किंचिदवेक्षमाणा ।
दृशोश्चकाराद्भुतपारणं सा
प्राग्भारताख्ये भुवने पुराणे ॥४४॥

40. "What if Science and its treasures
Lie unlocked within their reach?
What if holy priests and minstrels,
High-toned precepts daily teach?

41. "'Me' and 'Mine' divide and rend them,
Blissful else this brilliant race;
Till one's higher self is wakened
Vain are hopes of Heavenly grace.

42. "For they seek not life eternal,
Too allured by joys of sense,
Who can thus avert the countless
Woes of birth and death intense?

43. "If their wit and power and culture
Urge them not to the nobler goal
How can mortals not so blessed
Taste the beauties of the soul?"

44. Failing thus to meet her likeness
In the virtues of the mind,
Foiled Uma's glances eager
Turned to where lies ancient Ind.

45. Bowing to her hoary father—
Himavan, the abode of snow—
Sad she pondered on his wrinkles
Worn deep upon his brow,—

46. Wrinkles wrought by sights of suffering
Sights of struggle, sights of woe;—
And dull care sat on his features
Melting into tears below.

47. ' What, my father, O my father,
What has thee afflicted so?
Art thou moved by India's fortunes,
Is it hence thy tears so flow ?

48. "True, alas, her fate awakens
Pity in the driest heart ;
For in this the land of Rishis,
Land renowned for lore and art.

49. "Where sage Visvamitra famous
To excel Vasishta strove;
Where penances hard and awful
Rendered holy grot and grove?

महानुभावं पितरं प्रणम्य
हिमालयं भ्रूसविवेपु तस्य ।
विलोक्य दुर्दर्शवलीस्सखेदं
विचिन्तयामास विमूढचेताः ॥४५॥

संसारकूपे पततां नराणां
सशोकमोहा विपदो विलोक्य ।
वलीकृतस्यास्य बभूव चिन्ता
तमोमयी साऽश्रुभरेति मेने ॥४६॥

हा नाथ मे तात तमः किमेतत्
हृत्क्षोभमोहो बत ते कुतोऽभूत् ।
किं भारतोर्वीस्थितिजातचिन्ता
यद्बाष्पवर्षानिह मुञ्चसि त्वम् ॥४७॥

ध्रुवं घृणा तत्स्थिति वीक्षणेन
कठोरचेतस्यपि जायते हा ।
महर्षिभूमिर्यदियं पवित्रा
विद्याकलाढ्या जगति प्रसिद्धा ॥४८॥

स्पर्धा वसिष्ठेन समं पुराऽभू-
द्यत्र प्रसिद्धा मुनिकौशिकस्य ।
तपांसि यस्यां जगदद्भुतानि
चक्रुः पवित्राणि गुहावनानि ॥४९॥

श्रीरामवीर्याप्तजयाञ्चितैषा
श्रीकृष्णलीलामहिमात्तवेषा ।
कर्शद्धरिश्चन्द्रकथाविशेषा
धर्मिष्ठकार्याहतसत्यभूषा ॥५०॥

सद्ब्राह्मणा यत्र लिलङ्घिरे न
स्वधर्मरक्तास्स्मृतिचोदितोक्तीः ।
विगर्ह्य सर्वं धनमानगर्वं
जनप्रशंसापरवसेका नो ॥५१॥

सदाग्निहोत्रैर्विहिताग्निपूजा-
स्सन्ध्यापरा स्सूर्यकृते सकाले ।
परात्मजीवात्मसमर्पणार्था-
स्स्वतन्त्रचेष्टानिजतुष्टिभाजः ॥५२॥

सा ब्राह्मणस्यात्र दशाऽद्य भिन्ना
दम्भाभिमानो धनलुब्धचेताः ।
अन्तस्थतेजोभिभवात्स आस्ते
भग्नो रवेर्दुर्ग इवास्तकाले ॥५३॥

सनातनस्यार्यकुलस्य मूलं
सा ब्राह्मणं वीक्ष्य कृपार्द्रचित्ता ।
शोच्यां दशां तामनुभावयन्ती
कारुण्यवाण्येत्थमसुंबभाषे ॥५४॥

50. "This, the scene of Rama's triumph,
Of child Krishna's sweet disports?
Scene of Harischandra's trial,
Land where Truth with Right consorts?

51. "Where a Brahman bent on duty
Swerves not from the sacred laws,
And, in scorn of rank and riches,
Slaves not for the mob's applause?

52. "Where are fires of Agnihotra,
Timely Arghyas to the Sun?
Where, content and independence,
Self-merged in the shining one?

53. "O, the Brahman's ways are altered,
Wealth allures him, pomp he [courts,
And, shorn of inner glory, shines in
Sun-set glow, like ruined forts"—

54. Turning with pity to the Brahman,
Scion of an ancient line,
And to him these words addressing
Deep bewailed his sad decline:—

55. "Thou wast known for self-denial
For spiritual wisdom ripe;
Fled from thee are all such virtues,
Brahman of the modern type!

56. "Hast thou, Brahman, chants forgotten
Leading to beatitude?
Is thy lot but to be vying
Each with each for servitude?

57. "Ah, the woeful transformation
Fills my heart with restless pain;
And if Europe rouses pity,
Thou but movest my disdain.

58. "Fie upon low aim and striving,
Selfish scheme, and soulless prayer;
Where plain life and truth are honored,
Powers divine are centred there.

59. "Give up greed and aggrandizement,
Give up ways uncouth and mean;
Cultivate the heart and spirit,
Know in Love true power is seen.

भो ब्राह्मण त्वं कलिवर्त्मचारिन्
वैराग्यभूमिर्निजतत्ववेदी ।
एवं पुराऽभूर्विदितोऽत्र तेऽद्य
क्व ते गुणा जाग्रति भान्ति सर्वे ॥५५॥

त्वं वेदशास्त्राध्ययनं पवित्रं
मुक्तिप्रदं विस्मरसि स्म किं भोः ।
परस्परं सेवकवृत्तिकार्ये
स्पर्धैव किं ते निजभागधेयम् ॥५६॥

विषादरुद्धा परिणाम एवं
निकृन्तति क्षीणबलं मनो मे ।
इरोपदेशे यदि मेऽनुकम्पा
निकृष्टभावस्त्वयि केवलं भोः ॥५७॥

धिक्तुच्छलक्ष्यं धिगधःप्रयत्नं
स्वार्थीयचेष्टां धिगनात्मपूजाम् ।
अदम्भसत्यव्रतजीविते हि
प्रतिष्ठिता सर्वविभूतिशक्तिः ॥५८॥

त्वं स्वप्रतिष्ठां त्यज भो दुराशां
नीचाध्वसञ्चारधियं विगर्ह्याम् ।
सौहार्दमेव प्रतनु प्रकामं
प्रीतौ विजानीहि बलं स्वकीयम् ॥५९॥

स्वाधीनतार्थः प्रणयोऽखिलेषु
श्रद्धाबलं हि प्रणयस्य मूलम् ।
श्रद्धाऽसमर्था यदि कार्यसिद्ध्यै
किं जीवितेनाथ किमीश्वरेण ॥६०॥

तद्धर्महीनं लवणं भवेच्चेत्
कुर्यात्किमन्यल्लवणस्वभावम् ।
स्वान्तः सुखे रागघनावृते ते
भवाब्धिनौकातरणं कथं स्यात् ॥६१॥

व्यासं शुकं संस्मर याज्ञवल्क्यं
पुरातनर्षीन् नुतपुण्यकीर्तीन् ।
तद्ब्रह्मतेजः किमहो विलुप्तं
तद्दिष्टमार्गाः किमरं विनष्टाः ॥६२॥

माऽनन्यतन्त्रप्रकृतिं सुखेन
विक्रीय मुह्य क्षणभङ्गुरेण ।
मा तोलयैतद्बलमानवित्तै-
र्माऽऽनन्दरूपं त्यज नित्यभोगम् ॥६३॥

स्वप्नेऽपि मा चिन्तय तुच्छभावं
जात्यैव पूज्योऽत्र जनस्सदेति ।
उन्मत्तबुद्धिर्यदि सा न रुद्धा
तदा मुदा यान्त्यखिलापदस्ते ॥६४॥

60. "Love for all is truest freedom,
"Love unwavering faith implies;
And if Faith should prove defenceless,
God and Life are gilded lies.

61. "If the salt have lost its saltness
What can salt it, what can cheer?
If thy mind's with passion clouded
The ship of life how canst thou
[steer?

62. "Think of Suka, Yajnavalkya,
Badarayana of old,
Has their fire become extinguished,
Are their ashes grown so cold?

63. "Barter not the spirit's freedom,
Weigh it not'gainst wealth and
[power,
Forfeit not the bliss eternal
For the advantage of the hour.

64. "Dream not that mere birth entitles
One to meaningless respect;
Sad disasters must thence follow
Unless the mad career is checked

65. "Should thy brethren in blind fury,
Threaten with the lance and brand,
Still remember they are brethren,
Lift not thy avenging hand.

66. "Virtue teach by self-denial,
Patience by forbearance teach,
Holy wisdom of the Brahman
Teach by love for all and each.

67. "Love thy brethren, aid them, guide [them,
Strive not for vain mastery,
Dear to me are all my children,
To all the path of life be free!

68. Immolate thy life for country,
Muse not over child or wife,
Skulk not, sneak not philosophize not,
Just to save inglorious life."

69. "With her heart bleeding with sorrow
For the ills of human kind,
To retrace her steps to Kailas
Goddess Uma now inclined.

जना मदान्धा यदि भर्त्संयन्ति
त्वां निंद्यवाग्भिर्निशितासिघातैः ।
तितिक्षया त्वं न कुरु प्रतीपं
सर्वेऽनुजास्ते भगवत्प्रसूताः ॥६५॥
स्वार्थानपेक्षी सुमनास्तितिक्षु-
स्त्वं शिक्षयान्यान् सुगुणान् विशालान् ।
भूतानुकम्पा प्रणयोऽखिलेषु
ब्रह्मज्ञभावस्य हि लक्षणं भोः ॥६६॥
प्रियस्सहायस्सुखमार्गदर्शी
तवानुजानां भव माऽधिपोऽभूः ।
सुता हि सर्वे प्रियवत्सला मे
तज्जीविताध्वा प्रसरत्वबाधम् ॥६७॥
स्वदेशसेवां कुरु देहयज्ञात्
सतीसुतार्थव्यसनानि हित्वा ।
हेयार्थलाभाय न ते मतिस्स्या-
त्ताटस्थ्यदैन्योद्धतशुष्कबोधात् ॥६८॥
दुस्तीर्णकष्टव्यसनैर्जनानां
संतप्तहृद्ब्राह्मणमेवमुक्त्वा ।
सादेवतोमा प्रतियातुकामा
कैलासलोकं विमना जगाम ॥६९॥

इति प्रथमस्सर्गः

अथ उमादर्शाख्ये तत्त्वार्थकाव्ये

द्वितीयस्सर्गः

ततः प्रयाता दिवि दिव्यदेशान्
ददर्श मार्गे मुहुरादरात्सा ।
यत्रामरत्वं सुकृतैरुपेत्य
चिराद्भुतौकेषु वसन्ति देवाः ॥ १ ॥

मन्दं मरुद्वाति न यत्र चण्डं
गान्धर्वगीतं श्रुतिरञ्जकं स्यात् ।
ये कामरूपा विहरन्ति कामं
विमृत्यवो वीतभया विशोकाः ॥ २ ॥

तज्जीविताशा पुनरेव तस्या-
स्सन्तृप्तकर्णाक्षिसुखं भजन्त्याः ।
निस्तीर्णदुर्गाश्रितकाननस्य
साधोरिवासादितगम्यभूमेः ॥ ३ ॥

लोकाननेकान् समतीत्य हर्षा-
दालोक्य तत्रस्थममर्त्यवर्गम् ।
ब्रह्मेन्द्रदेवर्षिमरुद्गणांश्च
कलत्रभाजः पथि सा जगाम ॥ ४ ॥

PART II.

1. On her way anon she witnessed
Fields ethereal and bright,
Where the gods advanced by merit
Dwell in scenes that ravish sight.

2. Varied strains of sweetest music,
Air unvexed by fitful storms,
Fearless, painless, deathless deities
Lightly skipping heavenly forms.

3. Soothed her ears and orbs of vision,
Re-awakened Uma's hopes,
As when a glade the pilgrim reaches,
And no more in thicket gropes.

4. Up she flew through worlds unending
Spying all the immortal race
Brahma, Indra armed with thunder
And their consorts passed apace.

5. "But their joy is brief," said Uma,
"Vain and empty pageant all;
Can these names and forms external
To my mind my likeness call?

6. "Where the soul and mind and body
All accord both in and out,
There I meet my sweetest image
Flawless bliss, without a doubt".

7. Disconcerted, sad, disheartened,
Backward Uma turned her flight
Soared to where the peaks of Kailas
Chase away the shades of night.

8. As she reached the gates of silver.
Nundi, God of Virtue bowed,
Bowing opened them for Uma,
While his eyes with gladness glowed

9. Silent brooding, stept in Uma,
Nor did straight her spouse she [seek.
Failure wrought upon her feelings
Heavenly tears bedewed her cheek

सुखं यदेषां सुतरामनित्यं
व्यर्थं समुत्सेककरं समस्तम् ।
बाह्यानि रूपाणि सरूपतां मे
भजन्ति नामानि कथं हि तस्मात् ॥ ५ ॥

अन्तर्बहिर्यत्र सदैकरूपो
देहत्रयोपाधिभिदात्मभावः ।
असंशयं बिम्बनिजस्वरूपं
पश्यामि तत्रेत्यवदत्तदा सा ॥ ६ ॥

कैलासशृङ्गार्कमयूखभासो
नुदन्ति यस्यां रजनीतमिस्रम् ।
दिशं हितां स्वीयगृहाश्रयां सा
प्रत्यागमत् खिन्नमना निराशा ॥ ७ ॥

द्वारं ततो राजतमागताया-
मस्यां हि नन्दी स्तुतधर्ममूर्तिः ।
प्रणम्य तां मोदविशालनेत्रो
ह्यपावृणोदस्य कवाटमारात् ॥ ८ ॥

निश्शब्दमन्तः प्रविवेश सोमा
हा नेक्षते स प्रियमन्तिकस्थम् ।
पराभवाक्रान्तविशिष्टभावा
[illegible]ारा ॥ ९ ॥

सुधाधुनीराजितभूमिभागं
लतागृहं सा तदनुप्रविश्य ।
मन्दानिलाकम्पितपुष्पशय्यां
रम्यामधिश्रित्य रराज तन्वी ॥ १० ॥

हा हन्त दुर्दैवहताऽहमस्मि
व्यर्थं मया प्रार्थितमेव मन्ये ।
इत्थं सरिद्वेगरवप्रदीय-
श्राव्यस्वरेण प्रललाप साऽऽर्ता ॥ ११ ॥

याताऽस्मि पूर्वापरदक्षिणोद-
ग्भागेषु सर्वासु विदिक्षु चाहम् ।
पुरोः प्रसिद्धा भुवनान्यपश्यं
यादस्तरङ्गैर्भरितान् समुद्रान् ॥ १२ ॥

ऊर्ध्वेषु लोकेषु तथाऽधरेषु
प्रत्याशयाऽहं बहुधा निरैक्षे ।
जाता विलासे मयि चानुकम्पा
मिथ्याभिमाने व्यसनं सुराणाम् ॥१३॥

विचित्रसृष्टौ निजतत्त्वदृष्टिः
किं वा न जायेत विशोधनान्मे ।
विनाऽऽत्मनो ज्ञानमवैमि नूनं
वृथा सुखाशा भुवि जीविताशा ॥ १४ ॥

10. Turning to the shady arbours
Where with nectar flowed a brook
Sat she down on a bed of blossoms
Which the Zephyrs gently shook.

11. Then in a tone that sounded sweeter
Far than murmur of the stream,
Thus she plained; " Ah me, unlucky!
Futile is my quest. I deem.

12. "Eastward, Westward, Northward, Southward
Up and down still have I roamed;
Spied great cities, lands, and oceans
Where the whales and billows foamed;

13. "Earthly and celestial regions
Spurred bp hope have I explored;
Giddy sports of gods I pitied
And their vanity deplored.

14. "Can I not find in Nature
Some reflexion true of me?
Life and joys withcut self-knowledge
What advantage can they be?

15. "Mahadeva, Lore of Mercy,
Why now wilt thou try me so?
Have I been remiss in duty?
O, deign a mirror to bestow.

16. "Where the heart is rude, uncultured,
Natur's bounties are a waste;
In such soil can thrive no virtue:—
Where's my likeness to be traced?"

17. With benignant heart did Siva
Hear her wail and sad complaint,
"Deeply touched by her devotion
That forbade a stain or taint.

18. Soon before her stood Lord Siva,
Hastening to relieve her woes;
"Darling Uma," quoth he kindly,
"Cease to grieve, thyself compose.

19. "Life, analysis evading
Baffles feeble sense and mind;
For the Light that these illumines
Canst outside thee ever find?

स्वामिन् महादेव कृपाम्बुराशे
किं क्रीडसि त्वं व्यथया ममैवम् ।
किं भो च्युताहं निजधर्मकार्या-
ददर्शदानेन मयि प्रसीद ॥ १५ ॥

अज्ञानमूढे हृदये ह्यशुद्धे
व्यर्थास्समस्ताभ्युदयार्थलाभाः ।
न तत्र शङ्के सुगुणा वसन्ति
स्वरूपसाम्यं क्व लभेय साऽहम् ॥ १६ ॥

विशुद्धभक्त्याशयगुम्भितायां
तत्प्रार्थनायां दयितो दयात्मा ।
शुश्राव देवो व्यसनस्य बीजं
शिवश्शिवायाश्शिवमिच्छुरुच्चैः ॥१७॥

गुर्वीं शुचं लध्वपनेतुकामः
पुरस्स्थितोऽस्याः प्रणयी बभाषे ।
अयि प्रिये देवि जहीहि शोकं
द्रुतं मनःशान्तिमवाप्नुहीति ॥ १८ ॥

आत्माविचारादखिलेन्द्रियाणि
मनश्च मुह्यन्ति सुदुर्बलानि ।
बाह्यं समस्तं च यदात्मभास्यं
साध्या तदात्मप्रमितिर्न तेन ॥ १९ ॥

स्वप्ने सुषुप्तावथ जाग्रतीत्थं
जागर्ति कालत्रितये तवात्मा ।
विकारजातं प्रकृतिप्रभूतं
ह्यविक्रियः पश्यति नित्यसाक्षी ॥२०॥

आत्मानमेनं रमणीयरूपं
निध्याय देव्यत्र विचिन्तय त्वम् ।
स्वस्मिन् महिम्नि प्रतितिष्ठतैत-
द्ब्रह्माण्डतेजः क्व नु तेन साम्यम् ॥२१॥

अन्तर्मुखालोकनिरोधभूता
मायाऽऽत्मविज्ञानविरोधिनी सा ।
यन्मोहशक्त्या प्रविकर्षितं हा
सत्यात्मनो धावति कुत्सितार्थे ॥ २२ ॥

यस्या विलासाहितजालबद्धा-
श्शोचन्ति सर्वे विपदग्निदग्धाः ।
भित्त्वाऽथ तज्जालमलं समर्था-
स्स्वानन्दमाप्तुं परिपूर्णरूपम् ॥ २३ ॥

यद्धस्तसंपीडितदुर्बला हा
नष्टप्रभावा मृतिजन्मभाजः ।
नराश्च देवाश्च नयन्ति कालं
श्रान्ता विमुग्धाः पथिका इवात्र ॥२४॥

20. "Waking, sleeping, or a-dreaming
Still thy consciousness awake,
Changeless witnesses all changes,—
Witnessing without a break.

21. "Ponder and reflect, my Uma,
On the beauty of the soul,
Far exceeding in its glory
All the skiey orbs that roll.

22. "Maya throws on things a glamour
That precludes a glimpse inside,
Dazzles by her borrowed usplendour,
Drawing Mind from Truth aside.

23. "By her skill and machinations,
Groans the world under countless [ills;
Pierce her veil and know then truly
Bliss all space unbounded fills.

24. "Writhing in her grip unyielding,
Helpless man—as well as Gods—
Birth-entangled, stript of glory
Slow, like weary pilgrim, plods.

25. "Hence thy nature, pure unsullied
How can things outside reflect?
Wrong's the path that thou hast trodden
What but failure could'st expect?"

26. Unconvinced was Goddess Uma,
Discontented still remained;
Arguments impress no woman
If her wish is not attained.

27. When the storm bursts on the mountain,
Floods must overrun the dale;
When the woman's mind is made up
How can counsels sage prevail?

28. Siva marked her sullen humour,
And perplexed he 'gan to muse:
"What will comfort, my sweet Uma,
What contrivance can I use?

29. "Basic consciousness is Uma
How can objects her reflect?
Yet she needs must have a mirror,
Logic dry has no effect".

तन्निर्मले शुद्धनिजस्वरूपं
बाह्यार्थसंघाः किमु दर्शयेयुः ।
न साधुवर्त्मानुसृतं त्वयाऽत-
स्सिद्धिर्न जाताऽत्र तवेप्सितार्थे ॥२५॥

अनेन बोधेन शिवस्य तस्या
न प्रत्ययोऽभून्न तथैव तृप्तिः ।
अभीप्सितार्थे विफले न नार्य-
श्शृण्वन्ति केनापि कृतान् सुबोधान्॥२६॥

अधित्यकायां घनवृष्टिमत्यां
प्रक्षालिता स्यात् तदुपत्यकाऽलम् ।
स्त्रीभिस्स्वचित्ते तु कृते कठोरे
हितोपदेशा विफलीभवन्ति ॥ २७ ॥

तस्या मुखे वीक्ष्य शिवो विकारं
विचिन्तयामास निगूढभावः ।
शान्तिस्सुखं केन भवेत्प्रियायाः
पश्याम्यहं कां गुणवच्चिकित्साम् ॥२८॥

साक्षादधिष्ठानचिदेव सोमा
बाह्यार्थजातं किमु भासयेत्ताम् ।
तथाऽपि साऽऽदर्शमपेक्षते हा
सुनिष्फलः कारणकार्यवादः ॥ २९ ॥

शिवप्रभावेन समाधियोगे
निपातिता सा सुखिता प्रसुप्ता ।
निजस्वरूपानुभवात्तदानी-
मवैत्किल द्वैतकृतं न दुःखम् ॥ ३० ॥

रूक्षं स्वभावं प्रकरोति शान्तं
सौम्यं सुषुप्तिर्हृदयं कठोरम् ।
विषादरोगस्य रसायनं सा
दुःखानि धावन्ति सुषुप्तियोगे ॥ ३१ ॥

सुषुप्तिजातानि तदा मुखेऽस्या
ददर्श रोचींषि शिवो नवानि ।
उपावसद्वीक्ष्य सविस्मयस्तां
स्वापप्रभावेन सुखानुभोक्त्रीम् ॥ ३२ ॥

चापभ्रुवं तां सुनिमेषशोभां
सुनासिकां सारसनेत्रकान्तिम् ।
चन्द्राननां चन्द्रकलाललाटां
बिम्बाधरां निर्जितविद्रुमोष्ठीम् ॥ ३३ ॥

कपोलरागाप्तजनानुरागां
सुगन्धिनिश्श्वाससुपोषिताशाम् ।
सतीं स्तनक्षीरसुरक्षितायाँ
मध्योपदिष्टाखिलदुःखकार्श्याम् ॥३४॥

30. Then through Siva's powers exerted.
Uma fell into a trance,—
Self-absorbed and past distinctions,
Grieved no more at her mischance.

31. Sleep improves the sourest temper,
Softens oft the stiffest heart,
Sleep is balm to wounded feelings,
Sleep approaching, woes depart.

32. Siva now new charms discovers
In her face by sleep disclosed;
And admiring sits besides her
Who had such a task imposed.

33. Silver lids and ebony lashes
Jetty eye-brows, well-turned nose;
Golden forehead like the crescent,
Chiseled lips redder than rose;

34. Tender cheeks where pinks and roses
Strove to gain the mastery;
Fragrant breath, and breast slow-heav-
[ing,
Narrow waist and constancy;

35. Siva sits like statue, ravished,
Gazing on without an end,
Feels her curls, and smooths her tresses
His eyes unsated, o'er her bend

36. Vengeful cupid seized lhe moment.
Kindled Siva's heart with love ;
Siva kissed her into waking,
Waking like a startled dove.

37. "O,my lord, why did'st thou wake me,"
Murmured Uma when she woke,.
"From a dreamless, blissfull slumber
That thy fervid kissing broke?

38. "Pain, and sorrrw from me banished
'Twas a spell of ecstasy;
I felt as if I floated on
A nectar sea from billows free.

39. "'Me' and 'mine' were both forgotten
And the world was whisked away;
Yet there was a bliss compareless,
Boundless, as asleep I lay.

शिवं स्वकान्तामनिमेषदृष्ट्या
निरीक्ष्य चित्रप्रतिमेव तस्थौ ।
स्पृष्ट्वालकान्तां कबरीं च तस्या
न तृप्तदृष्टिः स बभूव तस्याम् ॥ ३५ ॥

कामोऽरिमालक्ष्य विजेतुकामः
कामारिमायाद्भुतकामभावम् ।
कामाभितप्तः स चुचुम्ब कान्तां
कपोतवत्कातरमुत्थिता सा ॥ ३६ ॥

सुषुप्तिसौख्यानुभवात् कुतो नु
प्रबोधिताऽहं तव चुम्बनेन ।
ब्रूहि प्रियेति स्वयमुत्थिता सा
जगाद देवं रभसादुमैवम् ॥ ३७ ॥

दुःखानि दूरे व्यसनानि कृत्वा
मनोलयं प्राप्य समाधिभूमौ ।
आनन्दपीयूषमये समुद्रे
क्रीडाप्लवे तिष्ठति निस्तरङ्गे ॥ ३८ ॥

गता त्वहंता ममता च नष्टा
जगत् समस्तं स्मृतिशून्यमासीत् ।
तथाऽप्यनिर्वाच्यमखण्डरूपं
मयाऽनुभूतं नु सुखं सुषुप्तौ ॥ ३९ ॥

तारापथे तारविराजिते वा
भूमिस्थले भूरुहशोभिते वा ।
न वस्तु किञ्चित्प्रतिभातमासी-
दात्मैव सर्वत्र बभौ सदैकः ॥ ४० ॥

ममाद्य बाह्येषु सुखेषु काचित्
सर्वेषु वस्तुष्वपि नास्ति चिन्ता ।
गता त्वहंधीरपि दुःखमूला
लयं क्षणादात्मनि याति सर्वम् ॥४१॥

जाग्रद्दशा कालदिशोर्निदानं
ताभ्यां समस्तं परिणामकार्यम् ।
जनिर्मृतिस्तापकरं सुदुःखं
सर्वं प्रणष्टं कथमीश चित्रम् ॥ ४२ ॥

नृपत्वदेवत्वसुखं क्व देव
कात्मानुभूतं सुसुखं सुषुप्तौ ।
जाग्रत्सुखं हेयमनित्यमल्पं
तुल्यं नु किं स्वापमहासुखेन ॥ ४३ ॥

ऋते परिष्वङ्गसुखात्तवाहं
न तादृशीं जाग्रति वेद्मि शान्तिम् ।
सुभोग्यजातं मधुरं च मिष्टं
सुषुप्तिलेशेन तुलां भजेत्किम् ॥ ४४ ॥

40. "The azure vault with stars so studded,
And green-vestured earth so fair,
Objects all were clean out-blotted
Only self was glowing there.

41. "Still for things outside or pleasures
Knew I no anxiety;
Even sense of Ego vanished,
All the rest dissolved in me.

42. "Time and space that waking calls up?
And with them unceasing change,
Birth and Death, all woes tormenting
Disappeared. O, Lord, how [strange

43. "What is kingship or a godhead
When with blissful sleep compared
Waking-joys are shortlived, hollow;
Nothing to what my slumber [bared.

44. "Ne'er awake had I such feeling,
Save when clasped in thy embrace
No conserve of sweets, soft-honeyed,
Of its sweetness bears a trace.

45. "Words are dull and thought too [feeble
What can tell that bliss supreme?
Only can the eye turned inward
Undistracted catch its beam".

46. "True, too true" said Siva gladdened,
Then, can Mirrors paint the soul.
Thou art subject and the object.
Can a part reflect the whole?

47. "What thou felt is bliss enduring
'Tis thy nature sleep reveals;
Thou art all-inclusxive Brahman
As the enlightened truly feels

48. Nescience sows the seed of sorrow,
Givng rise to otherness,
Grasping now the one, the real,
Thou art steeped in blessedness.

49. But if still a mirror seekest
To reflect thy matchless charms,
Since impossible thy bidding,
What avail my might and arms?

जडाश्च शब्दाः कुटिलं मनस्त-
त्केनावगम्येत सुखं विशुद्धम् ।
अन्तर्मुखैकाग्रदृशः परं त-
त्प्रभा विभाति प्रणिधानगम्या ॥ ४५ ॥

दृढं त्वयोक्तं ननु दर्शयेत्त-
ह्यादर्शजातं कथमात्मरूपम्
स्वांशेन बोध्या विषयेन किं त्वं
सर्वांशिनी या विषयिस्वरूपा ॥४६ ॥

त्वयाऽनुभूतं हि सुषुप्तिबुद्धं
सुखात्मकं नित्यनिजस्वरूपम् ।
त्वं ज्ञैर्निभिर्गम्यमखण्डतत्त्वं
ब्रह्मैव सच्चित्सुखमित्यवेहि ॥ ४७ ॥

अज्ञानमाद्यं भवदुःखबीजं
द्वैतस्य वृत्तिस्समुदेति तस्मात् ।
सदैकसत्याश्रयणात्त्वमार्ये
निश्श्रेयसेऽर्थे हि निमज्जसीत्थम् ॥४८॥

आदर्शतो द्रष्टुमथापि चेत्त्वा-
ल्लावण्यकाष्ठामतुलां तवेच्छा ।
त्वंद्वांछिते तेन भवत्यसाध्ये
मद्बाहुशौर्येण फलं च किं स्यात् ॥४९॥

निद्रासमाधौ निजरूपभानं
ब्रह्म प्रकाश्यं निरुपाधि यत्र ।
जाग्रत्स्मृतिव्याप्तसुखाद्धरीया-
न्निर्वाणसंस्कार उदेति तस्मात् ॥५०॥

स्वप्ने पुरस्ते ह्यवशात्सुधीरं
नृत्यन्ति मायामयसर्वभावाः ।
अविक्रिया राजसि साक्षिरूपा
विकारजातस्य तु साक्षिणी त्वम् ॥५१॥

लिखेदुमे कस्तव भावचित्रं
तव प्रभावो न हि वर्णनीयः ।
चराचरं शिष्टमिदं विशिष्टं
त्वद्धामलेशेन विभाति नूनम् ॥५२॥

रम्यं विचित्रं च जगच्च सर्वं
ब्रह्मैव जानीहि विवर्तरूपम् ।
सद्ब्रह्मबुध्या ह्यसदन्यमत्या
भातीति तज्ज्ञाः प्रवदन्ति सन्तः ॥५३॥

जाग्रद्दशादृष्टविशिष्टभावा-
स्स्वापे भवन्त्यात्मनि भेदशून्याः ।
लीना पुनर्जाग्रति वासनाख्या-
स्तत्तत्क्रमात्तेऽत्र समुद्भवन्ति ॥५४॥

50. "Dreamless sleep presents thy likeness,
When no mask the Brahman [wears ;
Hence the print of bliss surpassing
That thy wakening memory [bears.

51. "And in dreams a world illusive
Dances fearless in thy sight
But thou witness still remainst,
Unaffected witness bright.

52. "Who can draw thy likeness, Uma ?
Ineffable glory thine,
And the rest, lifeless or living—
Broken lights of thee, they shine.

53. "And this Universe so-lovely
Is but Brahman in disguise;—
True, as Brahman, false as other—
Thus declare the great and wise.

54. "For the things beheld in waking,
Into self dissolve in sleep,
Undistinguished; and, at waking,
Into wondrous being leap.

55. "Every form of life and movement
Truly has thee for its soul;
Time and space, these cleave the [objects
While the self remains a whole.

56. "Through the brooklet and the [meadow
'Tis the Brahman glistens bright ;
From the self the star and lightning
Still derive their warmth and [light.

57. "Through the mortal, seize the [immortal.
Pierce the name-and-form [disguise ;
For the one appears as many
To the Maya-clouded eyes."

58. Words of love, and silver accents,
Words revealing deepest truth,
Facts profound of Life expounding,
Yet on Reason based, in sooth,

59. Changed the mood of gentle Uma
Made her feel her quest was [wrong,

रूपाणि सर्वाणि क्रियाश्च सर्वा-
स्त्वदेकसत्ता हि भवन्ति भान्ति ।
दिक्कालभिन्ना विषया भवन्ति
ह्यखण्डरूपोऽस्ति परं सदाऽऽत्मा ॥५५॥

सरिज्जले वा तृणवत्प्रदेशे
यद्भाति तद्ब्रह्म यतश्चिदेतत् ।
ताराश्च विद्युच्च सदाऽऽत्मनोऽस्मा-
दूष्म प्रकाशं सुखमाहरन्ति ॥ ५६ ॥

मर्त्यत्वमालक्ष्य भजामृतत्वं
त्वं भिन्धि वेषं कृतनामरूपम् ।
मायावृतानां हि दृशामबोधा-
द्ध्रुवं सदेकं बहुधा विभाति ॥ ५७ ॥

इत्थं महेशोक्तहितोपदेशा-
त्सत्यस्वरूपातिविमर्शकार्थात् ।
जीवात्मतत्त्वप्रविबोधरूपा-
त्सद्धेतुसिद्धान्तितपक्षसाध्यात् ॥ ५८ ॥

निवर्तितोमा गुरुचित्तवृत्ति-
स्स्वेच्छा सदोषेति विबोधितैषा ।
बाह्यार्थधीवासनयाऽतिदुष्टां
स्वप्रार्थनामात्मनि सा शुशोच ॥ ५९ ॥

जातानुतापा शिवमाह सोमा
तुभ्यं कृतज्ञाऽस्मि सुबोधयित्रे ।
अप्रगल्भनिर्बन्धकृतातियाच्ञां
क्षमस्व मां भो प्रिय मां क्षमस्व ॥६०॥

यदस्ति यद्भाति समस्तमेत-
न्मद्ब्रह्मरूपं विशदं समीक्षे ।
यूयं वयं चाखिलदृश्यलोका
द्वैतानवच्छिन्नसुखैकरूपाः ॥ ६१ ॥

मद्रूपमेतज्जगदात्मभूतं
नान्यद्धि किं दर्शयितुं समर्थम् ।
नादर्शकोऽस्त्यात्मसुदर्शनाय
ज्ञातं मम प्रार्थनतो मयेदम् ॥ ६२ ॥

अज्ञानशोकव्यसनादिचिन्ता
ध्वस्तास्समस्तास्सुखदुःखमोहाः ।
आनन्दपूर्णं हृदयं मदीयं
विभावये शाश्वतशान्तिरूपम् ॥ ६३ ॥

एकात्मभिन्नाकृतिदेवदेवौ
मिथस्सुसल्लाप्य रसादुमेशौ ।
हस्तेन हस्तं परिगृह्य धाम्नो
ह्यन्तर्दधाते सविधे चरन्तौ ॥ ६४ ॥

Made her to repent her wishes
That in her till now reigned strong.

60. "Thank you, love" said contrite Uma
For thy discourse, priceless, sweet;
Pardon, pardon, O, my boldness
Importunity unmeet.

61. "Clear I see my Brahmic nature
Comprehending all that is;
Thou and this unbounded cosmos
We are one unbroken bliss.

62. "True, my nature as the subject
Objects none can serve to show,
Mirror of the soul exists not,
This, my quest taught me to
[know.

63. "False delusion and sad error,
Woeful fancies, all have fled;
Joy sublime and peace eternal,
In my heart now dwell instead."

64. Thus awhile conversing, musing,
Godly couple, one in two,
Hand in hand, they walked through
[arbours
And were soon lost to the view

65, Blessings on fair Uma's mirror !
Blessings on her mirror-quest !
Blessings on the Lord of Mercy !
Narada the sage be blessed !

THE END.

Sri Vijaya Lakshmi Vilas Press, Bangalore City.

जीयादुमादर्शपरः पदार्थो
जीयादुमादर्शसुवाञ्छितार्थः ।
जीयादुमेशः करुणापयोधि-
र्जीयात्सुरर्षिर्वरनारदर्षिः ॥ ६५ ॥

इति श्रीकृष्णार्यस्मृतिगोचरे श्रीवेङ्कटरमणार्यविरचिते
उमादर्शाख्ये तत्त्वार्थकाव्ये द्वितीयस्सर्गः ।

॥ समाप्तमिदं काव्यम् ॥

(उत्तराङ्गम्) कविकालसूचिका—

श्रीकृष्णस्मृतिबोधं
काव्यं श्रव्यं चकास्तु विबुधेड्यम् ।
भास्वदुमादर्शाख्यं
वेङ्कटरमणेन सुग्रथितम् ॥

रक्ताक्षिचैत्रे सितपञ्चमेऽह्नि
संपूर्णमेतत्कलिवारखेशे । (५०२४)
क्रैस्ते शकेऽब्दे द्विसहस्रसंख्या-
षट्सप्ततिह्रासितलब्धसंख्ये ॥ (१९२४)

ओं तत्सत्

अनेकभक्तप्रविभक्तमेकं
लब्धं तदेकं ह्यवशिष्टमेकम् ।
एकेन पूर्णं बहुपूर्णमेक-
मेकं त्रिधाभूतमपीति चित्रम् ॥

टिप्पणी

ओकश्शब्दः सामान्येन सकारान्तो नपुम्सक-लिङ्गश्च , (अस्मिन् ग्रन्थे अकारान्ते पुल्लिङ्गे च प्रयुक्तो वर्तते । ८ पुटे १६ पुटेच) अत्रोपपत्तिः— अमरौके—अमेरिका (America), अपरौके—आःफ्रिका (Africa) इत्यर्थे, संज्ञावाचकत्वात् अकारान्त प्रयोगो न दुष्टः। अथवा लिङ्गतत्त्वविचारे, ओक इति अदन्तपुल्लिङ्गप्रयोगोऽपि वर्तते । यथा— ओकम्—क्री "उचेरिगुपधलक्षणे" के गुणः, कुत्वाच्च "ओक उचः के" (पाणिनिसूत्रम् ७-३-६४) इति निपात्यते [इति शब्दौघकल्पद्रुमः]। ओकः-गृहम् आश्रयः [इत्यमरटीकायां भरतादयः] । 'ओक उचः-के' इति निपातनाददन्तोपि (इत्यमरसुधा) । ओकम् आश्रयमात्रे मन्दिरे च नपुम्सकम् [इति मेदिनी] - ओकस्सद्माश्रयश्चौकाः पटः क्षीरम् पयोम्बु च । ओकः अदन्तोऽप्ययम् 'ओक उचः क' इति निपातनात्-आश्रयः, आश्रयमात्रम्(इति गुरुबालप्रबोधिका) औकस्त्वाश्रयमात्रे स्यात (इति हैमः) ।